**19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जानेवारी – २०२३**

**सत्र २ रे**

**विषयः आर्ष महाकाव्ये आणि पुराणे** (19R426)

**दिनांक :१०/०१/२०२३** **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ स्वभाषया अनुवादं कुरुत (त्रयाणाम्) ।** **(१८)**

१) जलप्रपातैरुद्भेदैर्निष्पन्दैश्च क्वचित् क्वचित्। स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः।।
बहुपुष्पफले रम्ये नानाद्विजगणायुते। विचित्रशिखरे ह्यस्मिन् रतवानस्मि भामिनि।।

२) व्यक्ताक्षरपदं चित्रं भाषितुं मधुरं त्वया। यथा स्वयंवरवृत्तं तत्सर्व हि श्रुतं मया।।
रमेऽहं कथया ते तु दृढं मधुरभाषिणि। रविरस्तं गतः श्रीमानुपोह्य रजनीं शिवाम्।।

३) स मे नाभिजनज्ञः स्यादाचरेयं च यद्विभो। तत्सर्वमेव पुत्रस्ते न मीमांसेत कर्हिचित्।।
एवं वसन्ती पुत्रे ते वर्धयिष्याभ्यहं प्रियम्। पुत्रैः पुण्यैः प्रियैश्चापि स्वर्गं प्राप्स्यति ते सुतः।।

४) मृगाणामिव शार्दूलो गरुडः पततामिव। वरः संनह्य मानानामर्जुनः किं करिष्यति।।
कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनोपमे। वेणीकृताशिरा राजन्नाम्ना चैव बृहन्नडा।

५) प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते। तपो मे हृदयं साक्षादात्माहं तपसोऽनघ।।
सृजामि तपसैवेदं ग्रसामि तपसा पुनः। बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः।।

**प्र. २ चतुर्णां वाक्यानां ससन्दर्भं स्पष्टीकरणं कुरुत।** **(२०)**

१) अपत्यानां स्नुषाणां च भीरु विद्ध्येतदासनम्।
२) विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम्।
३) तावता विस्तृतः पर्यक् त्रिभिः शृङ्गैः पयोनिधिम्।
४) साहं ब्रुवाणा सैरन्ध्री कुशला केशकर्मणि।
५) सूपानस्य करिष्यामि कुशलोऽस्मि महानसे।
६) निकृष्यमाणस्य जलेऽवसीदतेः विपर्ययोऽभूत्सकलं जलौकसः।

**प्र. ३** भागवतपुराणस्य सारं नाम 'चतुःश्लोकी भागवतं'– स्पष्टयत। **(१२)**

**अथवा**

गजेन्द्रमोक्षकथां स्वभाषया विवृणुत।

**प्र. ४ टिप्पणीद्वयं लिखत।** **(१०)**

१) गङ्गाशंतनुसंवादः
२) चित्रकूटस्य शोभा
३) अनुसूयया सीतायै दत्तं प्रीतिदानम्

----------